## उ). सद्वृत्तानि

समाजे जीवानां मनुष्याणां मनसः कायस्य च बहिस्थैः वस्तुभिः, कारणैः च सह सम्पर्कः भवति। ततः कायस्य मनसः च स्वभावे विकृतिः आयाति। यदि तादृग्विकृतेः पालनं नास्ति, तदा सा कायिकमानसिकरोगान् जनयति। तस्मात् स्वयंपालितं तादृशं समाजं लक्षीकृत्य आयुर्वेदेन आचारपद्धतिः उपदिष्टा अस्ति। एतद्धि 'सद्वृत्तानि' इत्यभिधानेन चरकसंहितायाम् आयाति।[१३] अपि च चिकित्सास्थाने आचारः एकं रसायनमिति दर्शयति।[१४] त्रिविधानां दोषाणां वैषम्यात् रोगाः जायन्ते। यदा मनसि राजसिकतामसिकगुणाः उत्सन्नाः भवन्ति तदा मनः ततः शरीरं रुग्णं भवति।[१५] तस्मात् राजसिकतामसिकगुणान् अभिगम्य सात्विकगुणवर्धनेन मानसिकस्वाथ्यवर्धनं सद्वृत्तानां लक्ष्यम्। सतां वा महात्मनां वृत्तं, लोकसम्मताचारविधिः 'सद्वृत्तम्' इति वक्तुं शक्यते।[१६]

चरकेण निर्दिष्टानि सद्वृत्तानि आचाररसायनं च मानसिकसद्वृत्तानि, शारीरिकसद्वृत्तानि, सामाजिकसद्वृत्तानि, धार्मिकसद्वृत्तानि, वैयत्तिकसद्वृत्तानीति वर्गेषु दर्शयितुं शक्यते। सद्वृतानुपालनेन आरोग्यमिन्द्रियविजयश्चेति लक्ष्यद्वयं युगपत् संपाद्यते।

## १). वैयत्तिकसद्वृत्तानि

### अ). भोजनसद्वृत्तानि

१. नारत्नपाणिर्नास्नातो नोपहतवासा नाजपित्वा नाहुत्वा देवताभ्यो नानिरूप्य

Scanned with CamScanner

पितृभ्यो नादत्त्वा गुरुभ्यो नातिथिभ्यो नोपाश्रितेभ्यो नापुण्यगन्धो नामाली नाप्रक्षालितपाणिपादवदनो नाशुद्धमुखो नोदङ्मुखो न विमना नाभक्ताशिष्टासुचिक्षुधितपरिचरो न पात्रीष्वमेध्यासु नादेशे नाकाले नाकीर्णे नादत्वाऽग्रमग्नये नाप्रोक्षितं प्रोक्षणोदकैर्नमन्त्रैरनभिमन्त्रितं न कुत्सयन्न कुत्सितं न प्रतिकूलोपहितमन्नमाददीत।

२. न पर्युषितमन्यत्र मांसहरितकशुष्कशाकफलभक्ष्येभ्यः।

३. नाशेषभुक् स्यादन्यत्र दधिमधुलवणसक्तुसर्पिभ्यः।

४. न नक्तं दधि भुञ्जीत।

५. न सक्तूनेकानश्नीयान्न निशि न भुक्त्वा न बहून्न द्विर्नोदकान्तरितात्।

## आ). वाचसिकसद्वृत्तानि

१. नानृतं ब्रूयात्।

२. न अन्यदोषान् ब्रूयात्।

३. न गुह्यं विवृणुयात्।

४. न चातिब्रूयात्।

५. पूर्वाभिभाषी (प्रथमसंभाषणशीलः) स्यात् ।

६. काले हितमितमधुरार्थवादी स्यात्।

७. सत्यवादी स्यात्।

८. प्रियवादी भवेत्।

## इ). शारीरिकसद्वृत्तानि

१. मलायनेष्वभीक्ष्णं पादयोश्च वैमल्यमादध्याात्।

२. त्रिः पक्षस्य (पञ्चभिः पञ्चभिः दिनैः) केशश्मश्रुलोमनखान् संहारयेत्।

३. नित्यम् अनुपहतवासाः (अम्लानवासाः)भवेत्।

४. सुमनाः सुगन्धिः स्यात्।

५. साधुवेशः स्यात् ।

Scanned with CamScanner

६. प्रसिद्धकेशः (प्रसाधितकेशः) स्यात्।

७. मूर्धश्रोत्रघ्राणपादतैलनित्यः स्यात् ।

८. धूमपः स्यात् ।

९. प्राक् श्रमाद् व्यायामवर्जी स्यात्।

१०. नान्यस्वमाददीत।

११. नान्यस्त्रियमभिलषेन्नान्यश्रियम्।

१२. न कुर्यात् पापम्।

१३. न पापेऽपि पापी स्यात्।

१४. न जानुसमं कठिनमासनमध्यासीत।

१५. नानास्तीर्णमनुपहितमविशालमसमं वा शयनं प्रपद्येत।

१६. न साहसातिस्वप्नप्रजागरस्नानपानाशनान्यासेवेत।

१७. नोर्ध्वजानुश्चिरं तिष्ठेत्।

१८. न व्यालानुपसर्पेण दंष्ट्रिणो न विषाणिनः।

१९. पुरोवातातपावश्यायातिप्रवाताञ्जह्यात्।

२०. कलिं न रमेत।

२४. नासुनिभृतोऽग्निमुपासीत नोच्छिष्टः।

२५. नाधः कृत्वा अग्निं प्रतापयेत्।

२६. नाविगतक्लमो नानाप्लुतवदनो न नग्न उपस्पृशेत्।

२७. न स्नानशाट्या स्पृशेदुत्तमाङ्गः।

२८. न केषाग्राण्यभिहन्यात्।

२९. नोपस्पृश्यन्ते एव (स्नानवाससी/स्नानकालात् पूर्वं धृते) वाससी बिभृयात्।

३०. न दुष्टयानान्यारोहेत।

३१. न गिरिमस्तकेष्वनुचरेत्।

३२. न द्रु ब् ममारोहेत्।

Scanned with CamScanner

३३. न जलोग्रवेगमवगाहेत।

३४. छत्री दण्डी मौली सोपानात्को युगमात्रदृग्विचरेत्।

### ई). धार्मिकसद्वृत्तानि

१. देवगोब्राह्मणगुरुवृद्धसिद्धचार्यानर्चयेत्।

२. अग्निमुपचरेत्।

३. ओषधीः प्रशस्ता धारयेत्।

४. द्वौ कालावुपस्पृशेत् (सायं प्रातश्च स्नायात्/सन्ध्यामुपासीत)।

५. होता स्यात्।

६. यष्टा स्यात् ।

७. दाता स्यात् ।

८. चतुष्पथानां नमस्कर्ता स्यात् ।

९. बलीनामुपहर्ता स्यात् ।

१०. धार्मिकः स्यात् ।

११. न हुंकुर्याच्छवम्।

१२. नास्पृष्ट्वारत्नाज्यपूज्यमङ्गलसुमनसोऽभिनिष्क्रामेत्।

१३. न पूज्यमङ्गलान्यपसव्यं गच्छेन्नेतराण्यनुदक्षिणम्।

१४. न जपहोमाध्ययनबलिमङ्गलक्रियासु श्लेष्मसिङ्घाणकं मुञ्चेत्।

### उ). मानसिकसद्वृत्तानि

१. सुमुखः स्यात् ।

२. दुर्गेष्वभ्युपपत्ता (दुर्गतिपतितानां रक्षिता)भवेत्।

३. वश्यात्मा (वश्येन्द्रियः)भवेत्।

४. धर्मात्मा भवेत्।

Scanned with CamScanner

५. विनयबुद्धिविध्याभिजनवयोवृद्धसिद्धचार्याणामुपासिता भवेत्।

६. मङ्गलाचारशीलः स्यात् ।

७. कुचेलास्थिकण्टकामेध्यकेशतुषोत्करभस्मकपालस्नानबलिभूमीनां परिहर्ता भवेत्।

८. हेतावीर्ष्युः स्यात् (येन हेतुनाऽयं धनवान् विद्यावान् वा जातः स हेतुर्मे कथं भवेदिति प्रयत्नवता भवितव्यम)।

९. फले नेर्ष्युः स्यात् (परस्य न धनादिफलसंबन्धनिवारणेच्छा कर्तव्यम्)।

१०. निश्चिन्तः स्यात् ।

११. निर्भीकः स्यात्।

१२. ह्रीमान् भवेत्।

१३. धीमान् भवेत्।

१४. महोत्साहः स्यात्

१५. दक्षः स्यात् ।

१६. क्षमावान् भवेत्।

१७. सर्वप्राणिषु बन्धुभूतः स्यात्।

१८. क्रुद्धानामनुनेता स्यात् ।

१९. अमर्षघ्नः स्यात् ।

२०. प्रशमगुणदर्शी भवेत्।

२१. रागद्वेषहेतूनां हन्ता भवेत्।

२२. न वैरं रोचयेत्।

२४. न अन्यरहस्यमागमयेत् (बुध्येत)।

२५. सत्यसंधः स्यात् ।

२३. सामप्रधानः स्यात्

२४. परपुरुषवचनसहिष्णुः स्यात् ।

२५. नाहंमानीस्यान्नादक्षो नादक्षिणो नासूयकः।

Scanned with CamScanner

२५. नाविश्रब्धस्वजनः स्यात्।

२६. न चञ्चलं मनोऽनुभावयेत्।

२७. न बुद्धीन्द्रियाणामतिभारमादध्यात्।

२८. न क्रोधहर्षावनुविदध्यात्।

२९. न शोकमनुवसेत्।

३०. प्रकृतिम् (उत्पत्तिकारणम्) अभीक्ष्णं स्मरेत्।

३१. नापवादमनुस्मरेत्।

३२. अनहंकृतः स्यात्।

## २. सामाजिकसद्वृत्तानि

१. अतिथीनां पूजकः स्यात्।

२. पितृभ्यः पिण्डदः स्यात्।

३. भीतानामाश्वसयिता स्यात्।

४. दीनानामभ्युपपत्ता स्यात्।

५. नाधार्मिकैर्न नरेन्द्रद्विष्टैः सहासीत नोन्मत्तैर्न भ्रूणहन्तृभिर्न दुष्टैः।

६. नाग्न्युत्पातमभितश्चरेत्।

७. न कुलच्छायामुपासीत।

८. नोच्चैर्हसेत्।

९. न शब्दवन्तं मारुतं मुञ्चेत्।

१०. नानावृतमुखो जृम्भां क्षवथुं हास्यं वा प्रवर्तयेत्।

११. न नासिकां कुष्णीयात् (विघ येत्)।

१२. न दन्तान् विघ येत्।

१३. न नखान् वादयेत्।

१४. नास्थीन्यभिहन्यात्।

Scanned with CamScanner

१५. न भूमिं विलिखेत्।

१६. न छिन्द्यात्तृणम्।

१७. न लोष्टं मृद्नीयात्।

१८. न विगुणमङ्गैश्चेष्टेत।

१९. ज्योतींष्यनिष्टममेध्यमशस्तं च नाभिवीक्षेत।

२०. न चैत्यध्वजगुरुपूज्याशस्तच्छायामाक्रामेत्।

२१. न क्षपास्वमरसदनचैत्यचत्वारचतुष्पथोपवनश्मशानाघातनान्यासेवेत।

२२. नैकः शून्यगृहं न चाटवीमनुप्रविशेत्।

२३. न पापवृत्तान् स्त्रीमित्रभृत्यान् भजेत।

२४. नोत्तमैर्विरुध्येत।

२५. नावरानुपासीत।

२६. न जिह्मं रोचयेत्।

२७. नानार्यामाश्रयेत्।

२८. न भयमुत्पादयेत्।

२९. नानृजुः क्षुयान्नाद्यान्न शयीत।

३०. न वेगितोऽन्यकार्यः स्यात्।

३१. न वाय्वग्निसलिलसोमार्कद्विजगुरुप्रतिमुखं निष्ठीविका वातवर्चोमूत्राण्युत्सृजेत्।

३२. न पन्थानमवमूत्रयेन्न जनवति नान्नकाले।

३३. न स्त्रियमवजानीत।

३४. नातिविश्वसेत्।

३५. न गुह्यमनुश्रावयेत्।

३६. नाधिकुर्यात्।

३७. न रजस्वलां नातुरां नामेध्यां नाशस्तां नानिष्टरूपाचारोपचारां नादक्षां नादक्षिणां

Scanned with CamScanner

नाकामां नान्यकामां नान्यस्त्रियं नान्ययोनिं नायोनौ न चैत्यचत्वारचतुष्पथोपवन-श्मशानाधातन-सलिलौषधिद्विज-गुरुसुरालयेषु न सन्ध्ययोर्नातिथिषु नाशुचिर्नाजग्धभेषजो नाप्रणीतसङ्कल्पो नानुपस्थितप्रहर्षो नाभुक्तवान्नात्यात्यशितो न विषमस्थो न मूत्रोच्चारपीडितो न श्रमव्यायामोपवासक्लमाभिहतो नारहसि व्यवायं गच्छेत्।

३९. न सतो न गुरून् परिवदेत्।

४०. नाशुचिरभिचारकर्मचैत्यपूज्यपूजाध्ययनमभिनिवर्तयेत्।

४१. नातिसमयं जह्यात्।

४२. न नियमं भिन्द्यात्।

४३. न नक्तं नादेशे चरेत्।

४४. न सन्ध्यास्वभ्यवहाराध्ययनस्त्रीस्वप्नसेवी स्यात्।

४५. न बालवृद्धलुब्धमूर्खक्लिष्टक्लीबैः सह सख्यं कुर्यात्।

४६. न मद्यद्यूतवेश्याप्रसङ्गरुचिः स्यात्।

४७. न कञ्चिदवजानीयात्।

४८. अहिंसकः भवेत्।

४९. ब्रह्मचर्यज्ञानदानमैत्रीकारुण्यहर्षोपेक्षाप्रशमपरश्च स्यात्।

५०. न गवां दण्डमुद्यच्छेत्।

५१. न वृद्धान्न गुरून्न गणान्न नृपान् वाऽधिक्षिपेत्।

५२. न वीर्यं जह्यात्।

५३. न बान्धवानुरक्तकृच्छ्रद्वितीयगुह्यज्ञान् बहिष्कुर्यात्।

५४. नाधीरो नात्युच्छ्रितसत्त्वः स्यात्।

५५. नाभृतभृत्यः स्यात् ।

५६. न कृतमित्याश्वसेत्।

Scanned with CamScanner

५७. नैकः सुखी स्यात्।

५८. न दुःखशीलाचारोपचारः स्यात्।

५९. न सर्वविश्रम्भी भवेत्।

६०. न सर्वाभिशङ्की भवेत्।

६१. न सर्वकालविचारी स्यात्।

६२. न कार्यकालमतितापयेत्।

६३. नापरीक्षितमभिनिविशेत्।

६४. नेन्द्रियवशगः स्यात्।

६५. हेतुप्रभावनिश्चितः स्याद्धेत्वारम्भनित्यश्च भवेत्।

६६. न चातिदीर्घसूत्री स्यात्।

६७. न सिद्धावुत्सेकं यच्छेन्नासिद्धौ दैन्यं।

६८. न विद्युत्स्वनार्तवीषु नाभ्युदितासु दिक्षु नाग्निसंप्लवे न भूमिकम्पे न महोत्सवे नोल्कापाते न महाग्रहोमपगमने न नष्टचन्द्रायां तिथौ न सन्ध्ययोर्नामुखाद्गुरोर्नावपतितं नातिमात्रं न तान्तं न विस्वरं नानवस्थितपदं नातिद्रुतं न विलम्बितं नातिक्लीबं नात्युच्चैर्नातिनीचैः स्वरैरध्ययनमभ्यस्येत्।

६९. देशकालप्रमाणज्ञः भवेत्।

७०. युक्तिज्ञः स्यात्।

७१. पापवृत्तवचाः, सूचकाः, कलहप्रियाः, मर्मोपहाविनः, लुब्धाः, परवृद्धिद्विषः, शठाः, परापवादरताः, चपलाः, रिपुसेनिनः, निर्गुणाः, त्यक्तधर्माणः नराधमाश्च परिवर्ज्याः।[१७]

७२. बुद्धिविद्यावयःशीलधैर्यस्मृतिसमाधिभिः युक्ताः वृद्धाः, स्वभावज्ञाः, गतव्यथाः सर्वभूतानां सुमुखाः, प्रशान्ताः, शंसितव्रताः, सन्मार्गवक्तारः, पुण्यश्रवणदर्शनाश्च सेव्याः।

यदि कोऽपि एवंविधसद्वृत्तानि स्वस्थवृत्तानि च सम्यगनुतिष्ठति तर्हि सः अव्याधिः

Scanned with CamScanner

भवति अपि च वर्षशतं यावत् सः आयुषा न वियुज्यते। न केवलं तस्य ऐहिकजीवनं सुखेन यशसा च प्रवर्तते पारलौकिकं जीवनमपि सुखं प्राप्नोति।[९८] आगन्तुरोगनिवारणार्थम् उपशमनार्थं च एतादृक्सद्वृत्तानि अनुसरणीयानि सन्ति।[९९] सद्वृत्तपालनेन जनपदरोगाः न जायन्ते इति आयुर्वेदस्य विश्वासः अस्ति।[१००]

Scanned with CamScanner